Impact Factor : 6.240 ISSN 2349-364X

# वेदाञ्जलि Vedanjali

अन्तर्राष्ट्रीय विद्वत्समीक्षित षाण्मासिकी शोधपत्रिका

*(International Peer Reviewed Refereed Journal of Multidisciplinary Research)*

वर्ष-९ अंक-१८, भाग-२ जुलाई-दिसम्बर, २०२२

प्रधान सम्पादक
डॉ० रामकेश्वर तिवारी

सह सम्पादक
श्री प्रसून मिश्र

प्रकाशन : वैदिक एजूकेशनल रिसर्च सोसाइटी, वाराणसी

- स्वास्थ्य संरक्षण में हठयोग में वर्णित योगासनों का उपचारात्मक अनुप्रयोग — 153–157
  *Mr. Girish Singh Adhikari & Dr. Rajesh Kumar & Dr. Naveen Chandra Bhatt & Mrs. Vidya*
- दर्शनों का स्वरूप — 158–160
  *गिरीश भाई*
- एत्येधत्यूठ्सुसूत्रस्य प्रदीपपदमंजरीदिशा विवेचनम् — 161–164
  *सुधीरप्रसादनौटियालः*
- आधुनिकसंस्कृतसाहित्ये कवेः हर्षदेवमाधवस्य सिजोकाव्यसमीक्षणम् — 165–169
  *भास्कर गङ्गोपाध्यायः*
- भारतीय राष्ट्रीय आन्दोलन में कांग्रेस के उद्देश्य, कार्यक्रम तथा कार्य प्रणाली — 170–173
  *राजबीर*
- पत्रकारिता और साहित्यिक पत्रकारिता का समाज के परिप्रेक्ष्य में योगदान और महत्त्व — 174–177
  *डॉ0 सुधीर सैनी*
- गणित के विकास में प्राचीन भारतीय गणितज्ञों का योगदान — 178–182
  *डॉ0 चन्द्र कान्त शर्मा*
- संस्कृतवाङ्मये कालिदासस्य गौरवम् — 183–186
  *अमरेश कुमार अमर*
- धर्मशास्त्र में मनुस्मृति का महत्त्व — 187–190
  *डॉ0 ब्रजेन्द्र कुमार तिवारी*
- चतरा जिले के माध्यमिक विद्यालयों में अध्यापकों की अध्यापन के प्रति अभिवृत्ति का एक अध्ययन — 191–194
  *बबीता कुमारी*
- उच्च माध्यमिक स्तर के विद्यार्थियों में जीवन कौशल शिक्षा के प्रति जागरूकता का अध्ययन — 195–199
  *निर्मला कुमारी*
- संस्कृत कथाओं में युगजीवन के प्रति सन्देश — 200–202
  *डॉ0 मोहित बडोनी*
- भक्तप्रवरः नारदः — 203–204
  *डॉ0 हर्षदकुमार जोषी*
- धर्मशास्त्र में पराशर एवं पराशर स्मृति का योगदान — 205–208
  *डॉ0 ब्रजेन्द्र कुमार तिवारी*
- हिन्दी साहित्य में व्यंग्य की सार्थकता — 209–212
  *डॉ0 सरोज कुमार*
- पर्यटन विकास का भू–स्थानिक विश्लेषण (ढूँढाड़ प्रदेश के विशेष संदर्भ में) — 213–218
  *डॉ0 नरेन्द्र सिंह यादव*
- शिक्षकों के चिंता, अवसाद एवं तनाव स्तर पर योगाभ्यास के प्रभाव का अध्ययन — 219–224
  *Mr. Rajneesh Kumar Joshi & Mrs. Pushpa Bhatt & Dr. Naveen Chandra Bhatt & Prof. Madhu Lata Nayal*
- ग्रामीण पलायन का महिला की सामाजिक प्रस्थिति पर प्रभाव का अध्ययन — 225–230

*प्रतिभा सिंह*

♦ **हिंदी कहानियों में स्त्री विमर्श (विशेष संदर्भ : कृष्णा सोबती)** 231–233
*निशा*

♦ **Morality and Responsibility in the Society** 234–236
*Dr. Vikas Kumar*

♦ **Concept of Psychological well-being** 237–239
*Komal & Prof. Ganesh Shankar*

♦ **A study on role of Digital Payment methods in supporting Small and Medium Enterprises** 240–244
*Dr. Vikram Singh Chundawat*

♦ **New National Education Policy-2020: A Short Review** 245–249
*Manorma Nautiyal & Malvika Sati Kandpal*

♦ **IMPACT OF PESTICIDES IN SOIL IN SEMI-ARID ECOSYSTEM OF RAJASTHAN (A CASE STUDY OF JAIPUR DISTRICT)** 250–251
*Dr. Sita Ram*

♦ **The Linguistic and Cultural Identity of Bihar** 252–256
*Kameshwar Manjhi*

❖

# एत्येधत्यूठ्सुसूत्रस्य प्रदीपपदमञ्जरीदिशा विवेचनम्

• **सुधीरप्रसादनौटियालः**

भगवतो वेदपुरुषस्य महिमानं को वा विपश्चिन्नैव विजानीयात्। सर्वापि भारतीया संस्कृतिः वेदमूलिकैव। स च वेदः अपौरुषेयो नित्यश्चा वेदस्यार्थज्ञानाय शिक्षा कल्पः व्याकरणं निरुक्तः छन्दो ज्योतिषमिति षडङ्गानि विद्यन्ते। सर्वेषामप्यङ्गानां किमपि विलक्षणं स्थानं माहात्म्यं च विद्यते। षडङ्गेष्वपि व्याकरणशास्त्रं मुख्यमारादुपकारकञ्च। यद्यपि प्राचीनकाले भूयांसि व्याकरणानि व्यलसन् तथापि साम्प्रतं पाणिनीयं व्याकरणमेव प्रधानतया स्वीक्रियते। अत्र उत्सर्गापवादप्रक्रियामादित्य गभीरा भूयांसोऽपि विचाराः सरलतया लघीयस्या च पद्धत्या प्रतिपादिताः। पाणिनिप्रणीते अष्टाध्यायीनामके ग्रन्थे अष्टावध्यायाः सन्तिः प्रत्यध्यायं च चत्वारः पादा विद्यन्ते। 'एत्येधत्यूठ्सु'[1] इतिसूत्रं पाणिनीयाष्टाध्याय्याः षष्ठाध्यायस्य प्रथमे पादे एकोननवतितमं सूत्रम्। सूत्राणि षड्विधानि भवन्तीति वैयाकरणनिकाये प्रसिद्धिः –

**संज्ञा च परिभाषा च विधिर्नियम एव च।**
**अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम्॥**[2]

इति। यत्र विधायकत्वं तत्र विधिसूत्रमिति व्यवहारः। सूत्रमिदं वृद्धिविधायकम्। एतिश्च एधतिश्च ऊठ्चेति विग्रहः। एधति, एतीत्यत्र इक्श्तिपौ धातुनिर्देशे इति नियमेन श्तिपा निर्देशो बोध्यः। एवञ्च एत्येधत्योरित्यनेन इण्धातुः एधधातुश्च गृह्येते। 'एकः पूर्वपरयोः'[3] इति सूत्रस्यात्राधिकारः "आद्गुणः"[4] इति सूत्रात् पञ्चम्यन्तमादित्यनुवर्तते। एचोप्यत्रानुवृत्तिः तच्च 'यस्मिन् विधिस्तदादावल्ग्रहणे'[5] इति परिभाषया एजादिरित्यर्थो लभ्यते। एवञ्चैजादिषु एत्येधत्यूठ्सु परेषु पूर्वपरयोः स्थाने वृद्धिरेकादेशः स्यादिति सामान्यतः सूत्रार्थः फलति।

इदमपवादसूत्रमिति महाभाष्यप्रदीपे कैय्यट आह "एत्येधत्योः एङि पररूपमितिप्राप्ते ऊठि आद्गुणे च वृद्धिविधानम्"[6] इति। उप+एति, उप+एधतीत्यत्र "एङि पररूपम्"[7] इति सूत्रेण पररुपस्य प्राप्तिः प्रष्ठ+ऊहः इत्यत्र तु 'आद्गुणः'[8] इत्यनेन गुणरूपैकादेशस्य प्राप्तिः, इत्थं द्वयोरपि शास्त्रयोरपवादभूमितदं सूत्रमिति प्रदीपटीकाशयः।

"वृद्धिरेचि"[9] इत्यस्मात् सूत्रादिह एजिति पदमनुवर्तते परिभाषासहकारेण च तस्य एजादिरित्यर्थः तच्च कुत्र विशेषणमिति सन्देहो जायते। अत्र काशिकारो वदति "तदेतदेज्ग्रहणम् एतेरेव विशेषणमिति न पुनरेधतेः अव्यभिचारात्, ऊठश्चासम्भवात्। इण्गतौ इत्येतस्मिन् धातौ एचि, एध वृद्धौ इत्येतस्मिन् ऊठि च पूर्वं यदवर्णं ततश्च परो योऽच् तयोः पूर्वपरयोः अवर्णाचोः स्थाने वृद्धिरेकादेशो भवति"[10] इति। अत्र व्यभिचाराभावेन एजिति एधतौ न विशेषणमिति व्याचक्षाणः पदमञ्जरीकारः प्राह "न पुनरेधतेरव्यभिचारादिति। बाहुल्याभिप्रायेणैतदुक्तम्। अस्ति कस्यापि व्यभिचारः चङ्युपधाह्रस्व मा भवान् प्रेदिधदित्यत्रेत्याहुः[11] इति। पदमञ्जरीकारः सूत्रमिदं सुष्ठुतया(सुस्कीततया) व्याख्याति। कानिचन पदमञ्जरीटीकायाः पूर्वं वैशिष्ट्यानि प्रतिपादयामः। प्रष्ठौहः इत्यस्य व्याख्यानावसरे ऊहशब्दः कथं निष्पद्यते इति जिज्ञासायामाह पदमञ्जरीकारः "वहश्च इति ण्विः वाह, ऊठ् इत्यूठ सम्प्रसारणम् पूर्वत्वम्, ततो वृद्धिः" व्याख्यानेनानेन शब्दस्यार्थस्य च स्पष्टप्रतिपत्तिः जायते। काशिकायां पररूपगुणापवादः इति निगदितम् तत्र अनन्तरान् विधीन् बाधते इत्यादिकं च निरूपितमस्ति तत्र को हेतुरिति पदमञ्जर्यां स्पष्टीकृतम्। तस्यैव बाधको भवतीत्यत्रोक्तम् तद्बाध्यस्यावश्यम्भावित्वात् पूर्वमनन्तरस्यैव बाधो भवति तावता च बोधस्य चारितार्थ्यमित्यतः तदुत्तरतः बाधकं न भवतीति भावः। एवमक्षौहिणीत्यत्र आवश्यकेणिनिरिति विशेषविधानमप्यत्र निगदितम्। एवमेव स्वैरमित्यत्र नपुंसकत्वसाधनाय हेतुद्वयमुपन्यस्तम्। तत्र प्रथमो हेतुः क्रियाविशेषणत्वं यतो हि

---

• **शोधच्छात्रः, व्याकरणविभागः, काशीहिन्दूविश्वविद्यालयः, वाराणसी**

क्रियाविशेषणत्वस्य क्लीबत्वं भवतीति सर्वानुभवसिद्धम्। अथवा लिङ्गस्य लोकाश्रयत्वमाश्रित्य नपुंसकत्वं वक्तव्यमिति। एवमेवेति ग्रहणस्य निपातनादिनान्यथैव सिद्धिं प्रदर्श्यात्र तदुपन्यासो निरर्थक इत्यपि निरूपितम्। एष्य, एषः इति रूपद्वयसाधनाय च धातुत्रयं निदिष्टम्। तद्यथा "इष्यतेरिच्छतेरिष्णातेर्वा यदा ष्यत् तदा प्रैष्यः, यदा घञ् तदा प्रैषः" इत्यादिना। अग्रे ऋणार्णादिशब्दानामर्थ प्रतिपादनमपि व्यधायि। एवं प्रकारेण सूत्रार्थवर्णने, सूत्राशयहार्दविस्फोरेण, उदाहरणप्रत्युदाहरण-सङ्गतौ च पदमञ्जरीव्याख्या सर्वमपि टीकान्तरतमतिशेते इत्यत्र नास्ति संशयलेशः।

अत्र यदि पदमञ्जरीव्याख्यानं न भवेत् तर्हि केवलं काशिकाध्ययनेन यथार्थबोधो न स्यात्। एजादेः व्यभिचारस्य सत्त्वात् कथं तत्र एजादेरिति एधतौ न विशेषणमव्यभिचारादिति कथमुक्तमिति चेत् बाहुल्याभिप्रायेणेति समाधानमपि ददाति। इत्थञ्च मूलकारस्य खण्डनमकृत्वैव यथार्थवस्तुप्रतिपादनं पदमञ्जरीव्याख्याया महद्वैशिष्ट्यम्। प्रदीपपदमञ्जरीटीकयोः संवादित्वमप्यत्र दृश्यते। सूत्रे समस्तं सर्वं पदं ततश्चैकदेशे कथमेचोऽन्वयः इति शङ्कायां भाष्यकृता योगविभाग आश्रितः तत्र हेतुप्रदर्शयन्ना कैयटः "एकस्मिन् योगे एचि इत्यस्योठा सम्बन्धाभावादेकस्य द्वन्द्वार्थस्य विशेषणसम्बन्धाय विभागस्य कर्तुमशक्यत्वाद् योगविभागसंश्रयः[12] इति। द्वन्द्वघटकपदार्थानां प्रत्येकमभिसम्बन्धस्य सिद्धान्ततत्वेन स्वीकारात् योगविभाग एवाभीप्सितार्थसिद्धिरिति कैय्यटस्याशयः। श्रीमान् हरदत्तस्तु विषयममुं नैव विचारितवानस्ति।

प्रकृतसूत्रे अक्षादूहिन्यामिति वार्तिकं सर्वैरप्युपन्यस्तं वृद्धिविधानाय अक्षौहिणी इति रूपं च साधितम्। अक्षौहिणीशब्दस्य कोऽर्थः इति कैयटेन हरदत्तेन चोभाभ्यामपि विचारितम्। प्रदीपः शब्दस्यास्येत्यमर्थमाह "अक्षानूहतेऽवश्यमित्यावश्यके णिनिः साधनं कृतेति समासः[13]" इति। एतस्यैवार्थं वर्णयन्नाह नागेशभट्टः "ऊहिरत्र वह्यर्थः। अक्षाः रथावयवाः इदं च रथनुरगादीनामुपलक्षणम्। तान्परसेनां प्रति नियमेन प्रापयतीत्यर्थः। अक्षौहिणीशब्दः सेनाविशेषे रूढः। आवश्यके द्योत्ये निरुपपदो णिनिरित्युपपदसमासाभावादाह साधनमिति[14]। हरदत्तोप्यमुमेवार्थं स्पष्टमभिदधाति "अक्षैरूहतेऽवश्यमिति आवश्यके णिनिः साधनं कृतेति समासः"[15] एतेनात्यन्तं प्रामाणिकं कैयटाद्यनुमोदितं च व्याख्यानं हरदत्तः पदमञ्जर्यां करोतीति स्पष्टमवलोक्यते।

**काशिकाकारनागेशयोः साम्यम् –** एजाद्योः किम् प्रेदिधिदित्यत्र काशिकाकारस्य नागेशस्य च मतं समानं दृश्यते। काशिकायामेजाद्योरिति एधतेः नैव विशेषणमव्यभिचारदित्युक्तम् नागेशोऽपि मतमिदं समर्थयिति। कथं तर्हि प्रेदिधदित्यादि पदप्रयोग इति चेत् तथाविधप्रयोगाणामनभिधानमेवेति बोध्यम्। तथा च लघुशब्देन्दुशेखरस्य ग्रन्थः "परे तु इणीकारादौ प्रतिषेधः इति वार्तिक एधत्यनुपादानात् न त्वेधतेरव्यभिचारात् इति वृत्तेश्चास्यानभिधानमेव। एत्येधत्योरेचीति विशेषणम् इति भाष्यस्यैधत्यंशे सम्भवमात्रेणोपरञ्जकतया विशेषणमित्याशयः"[16] इति। अत्र नागेशेन प्राचामेव पक्षमुपादाय दीक्षितः खण्डितः।

**प्रकृते दीक्षिताशयः –** प्रोढमनोरमायां पूर्वं प्राचीनानां पक्षं प्रतिपाद्य अत्र कैयटः इत्यादिना कैयटमतं निरूपितमस्ति। एजादिरिति विशेषणमेधधातोरपि विद्यते अन्यथा मा भवान् प्रेदिधदित्यत्र व्यभिचारः स्यात्। अत्र एधधातोः अजादित्वेन आडागमे सति "आटश्च"[17] इति वृद्धिस्तु नैव शङ्क्या "न माङ्योगे"[18] इति आटोऽत्र निषेधात्। पुनस्तत्रायं प्रश्नः उत्थापितः "णौ चङ्युपधाया ह्रस्वः"[19] इत्यनेन ह्रस्वे सति नायमेधधातुरिति समाधानञ्च प्रस्तुतम् एकदेशविकृतमनन्यवदिति परिभाषया। यथा छिन्नपुच्छेऽपि शुनि श्वव्यवहारः न तु गर्दभादिव्यवहारः तथैव एकदेशस्य विकारे न हि तद्धातुत्वं तस्य व्याहतं भवतीति भावः। तत्र धि इत्यस्य द्वित्वे धिधि इत्यवस्थायां वस्नसोरिव प्रकृतिप्रत्ययविभागसम्मोहो जायत इति कृत्वा एधधातोः ज्ञानं न सम्भवेदित्यपि न शङ्क्यम् यतो हि द्विरूच्चारणस्यैव षाष्ठद्वित्वस्य प्रतिपादनात् तादृशसम्मोहस्यानवकाश एव। यदि कश्चित् प्रकृतिप्रत्ययसम्मोहः प्रतिपाद्यते चेत् णिलोपोऽपि तर्हि न सिद्ध्यति। तत्र हि अन्तरङ्गत्वेन पूर्वोपस्थितिनिमित्तसद्भावात् प्रथमतः "चङि"[20] इति सूत्रेण द्वित्वे कृते ह्रस्व एव न सम्भवेत् इति पूर्वपक्षः। ओणेः ऋदित्करणसामर्थ्यात् बहिरङ्गस्यापि "णौ चङ्युपधयाः ह्रस्वः"[21] इति ह्रस्वविधायकशास्त्रस्यैव पूर्वं प्रवृत्त्या नैविद्यते दोषलेशावसरसम्भवः।

**माधवमतम् –** माधवाचार्यः अत्रैवमाक्षिपति यत् एधधातुना ण्यन्तधातोः ग्रहणं नैव सम्भवति तस्य शब्दान्तरत्वात्। अत एव मा भवान् प्रेदिधदित्यत्र अतिव्याप्तिदोषोऽपि न जायते। ण्यन्तस्य शब्दान्तरत्वे मानमपि तेन प्रादर्शि यत् "न भाभूपूकमिगमिप्यायीवेपाम्"[22] इति सूत्रे "ण्यन्तस्य चोपसंख्यानम्"[23] इति वार्तिकमिति। कैयटेन न्यासकारेण हरदत्तेन च शब्दान्तरत्वेनाप्राप्तौ उपसंख्यानमिति व्याख्यातम्। यदि सामान्यत एव धातुग्रहणेन ण्यन्तस्यापि ग्रहणं स्यात्तर्हि उपसंख्यानकथनं व्यर्थमेवेति स्पष्टमेव।

किञ्च "उपसर्गात्सुनोतिसुवतिस्यतिस्तौतिस्तोभतिस्थासेनयसेधसिचसञ्जस्वञ्जाम्"[24] इति सूत्रे अभिषावयति इत्युदाहरणं प्रदर्श्य सावयति इति ण्यन्तेनाभेः योगः प्रदर्शितः। न तु सुनोतिप्रति इति कथं षत्वमित्याशंकितम्। प्रकृत्यर्थविशेषकत्वं प्रतिपाद्य च समाधानं तत्र प्रस्तुतम्। धातुना यदि ण्यन्तस्यापि ग्रहणं तर्हि एतादृशशङ्कासमाधानं न सङ्गच्छेत।

"हेरचङि"[25] इतिसूत्रसामर्थ्यात् प्रकृतिग्रहणे ण्यधिकस्यापि ग्रहणमिति तु सन्देहो न कार्यः। कुत्वविषये एव तज्ज्ञापकस्याङ्गीकारात्। एवमत्र कुत्वविषयस्याभावात् ण्यन्तग्रहणाप्रसक्ते प्रकृते यत् कैयटमतं तदयुक्तमिति माधवाशयः।
दीक्षितस्तु कैयटमतमेव समर्थयति। परं भट्टनागेशः दीक्षितमतं खण्डयति। इत्थं प्रकारेण प्रकृतसूत्रे विभिन्नानि मतानि समवलोक्यन्ते। अत्र वार्तिकान्यपि प्रसङ्गतः प्रोच्यन्ते –

१. अक्षादूहिन्यामुपसंख्यानम्
२. स्वादीरेरिणोः
३. प्रादूहोढोढ्येषैष्येषु
४. ऋते च तृतीयासमासे
५. प्रवत्सतरकम्बलवसनदशार्णानामृणे

इति। लक्षणानि सामान्यधर्मावच्छिन्नोद्देश्यकानि भवन्ति। अतः सूत्रं पाणिनिना प्रणीतम्। तत्र च केचन शब्दाः अवशिष्यन्ते तेषामपि साधुत्वप्रतिपादनाय कात्यायनः वार्तिकानि प्रणिनाय। अतः एतत्सूत्रविषयकेषु विशिष्य विचारा नावलोकिताः। एषां शब्दविशेषमनुसृत्यैव स्थितेः सत्त्वेन तथा स्थितिरिति भाति। "आद्गुणः"[26] इति सूत्रेण अक्ष+ऊहिनी इत्यादौ गुणे प्राप्ते एतेषां वार्तिकानामत्र तद्बाधकतया प्रवृत्तिरिति बोध्यम्।
सूत्रे च पदमञ्जरीकारस्य अन्येषां च वैयाकरणानां किं मतम् केषां कस्मिन्नर्थे साम्यं वैषम्यमिति चात्र यथामति निरुपितम्।

**सन्दर्भ -**

**1.** अष्टाध्यायी ६/१/८१
2. अल्पाक्षरमसन्दिग्धं सारवद् विश्वतोमुखम्। अस्तोभमनवद्यञ्च सूत्रं सूत्रविदो विदुः।।- वायुपुराणम्, 59/142
**3.** अष्टाध्यायी ६/१/८४
**4.** अष्टाध्यायी ६/१/८७
**5.** परिभाषेन्दुशेखर
**6.** एत्येधत्यूठ्सू प्रदीपटीका
**7.** अष्टाध्यायी ६/१/९४
**8.** अष्टाध्यायी ६/१/८७
**9.** अष्टाध्यायी ६/१/८७
10. काशिका ६/१/८१

**11.** पदमञ्जरीटीका-काशिका ६/१/८१
12. महाभाष्यप्रदीप: ८/१/८१
**13.** महाभाष्यप्रदीप: ८/१/८१
14. लघुशब्देन्दुशेखरे एत्येधत्यूठ्स्विति सूत्रव्याख्याने
15. काशिका, ८/१/८१ पदमञ्जरीटीका
16. लघुशब्देन्दुशेखरे, एत्येधठ्स्विति सूत्रव्याख्याने
**17.** अष्टाध्यायी ६/१/१०
**18.** अष्टाध्यायी ६/४/७४
**19.** अष्टाध्यायी ७/४/१
**20.** अष्टाध्यायी ६/१/११
**21.** अष्टाध्यायी ७/४/१
22. अष्टाध्यायी ८/४/३४
23. वार्तिकम्
**24.** अष्टाध्यायी ८/३/६५
**25.** अष्टाध्यायी ७/३/५६
**26.** अष्टाध्यायी ६/१/८६

**सन्दर्भग्रन्थसूची –**

1. **अष्टाध्यायी,** पाणिनिविरचिता, सम्पा०- डॉ० रमाशङ्करमिश्रः, मोतीलाल बनारसीदास, दिल्ली, पुनर्मुद्रितं संस्करणम्, २०१७
2. **काशिकावृत्तिः, (सप्तमो भागः),** वामनजयादित्यविरचिता, सम्पा०- जयशङ्करलालत्रिपाठी, तारा बुक एजेन्सी, वाराणसी, प्रथमं संस्करणम्, १९९०
3. **पदमञ्जरी, (द्वितीयो भागः),** हरदत्तमिश्रप्रणीता, संस्कृतपरिषद्, उस्मानियाविश्वविद्यालयः, हैदराबाद्, प्रथमं संस्करणम्, १९८१
4. **प्रक्रियाकौमुदी,** रामचन्द्राचार्यप्रणीता, संशोधकः- कमलाशङ्करः, भण्डारकर ओरियेन्टल इन्स्टीट्यूट, पूना, प्रथमावृत्तिः, सम्वत् १८४६
5. **प्रौढमनोरमा,** भट्टोजिदीक्षितप्रणीता, सम्पा०- डॉ० द्वारिकाप्रसादद्विवेदी, भारतीय विद्या संस्थानम्, वाराणसी, प्रथमं संस्करणम्, २००४
6. **लघुशब्देन्दुशेखरः, (षट्टीकोपेतः),** नागेशभट्टविरचितः, सम्पा०- प्रो. बालशास्त्री, चौखम्बा सुरभारती प्रकाशनम्, वाराणसी, २०१३
7. **लघुसिद्धान्तकौमुदी,** वरदराजप्रणीता, गीताप्रेस, गोरखपुर, पुनर्मुद्रितं संस्करणम्, सम्वत् २०७५
8. **व्याकरणदर्शने सृष्टिप्रक्रियाविमर्शः,** आचार्यरामयत्नशुक्लविरचिता, सम्पा०- डॉ० रामनारायणद्विवेदी, लुमिनस् बुक्स, वाराणसी, परिवर्धितं संस्करणम्, २०१९
9. **सिद्धान्तकौमुदी, (बालमनोरमा-तत्त्वबोधिनीसहिता),** गिरिधरशर्मणा परमेश्वरानन्दशर्मणा च सम्पादिता, मोतीलाल बनारसीदास, दिल्ली, पुनर्मुद्रितं संस्करणम्, २०१४

❖